# वार्षिकपरीक्षा, 2018-19

## संस्कृतम्

**अवधिः - होरात्रयम्** | **कक्षा - सप्तमी** | **पूर्णांकाः - अशीतिः**

**विद्यार्थिनः नाम ........................................................................................ वर्गः ....... दिनांकः - 18.2.2019 (सोमवासरः)**

**निर्देशाः -**
- **सर्वे प्रश्नाः अनिवार्याः सन्ति ।**
- **प्रश्नानाम् उत्तराणि खण्डक्रमानुसारं क्रमेणैव लेखनीयानि ।**
- **प्रश्नपत्रं चतुर्भागेषु विभक्तमस्ति अतः भागानाम् उल्लेखः करणीयः ।**

## खण्डः - 'क' (अपठितावबोधनम् - 10 अंकाः)

**प्र.1 अधोलिखितं गद्यांशं पठित्वा प्रदत्त-प्रश्नानाम् उत्तराणि लिखत -**

एकदा एकः काकः पिपासितः अभवत् । सः जलपानाय इतः ततः अभ्रमत् परन्तु कुत्रापि जलं न अपश्यत् अन्ते सः उद्याने एकं घटम् अपश्यत् । सः घटस्य समीपे अगच्छत् । तदा सः घटस्य मुखे उपाविशत् अपश्यत् च यत् घटे तु स्वल्पमेव जलम् अस्ति । अतः सः जलस्य पानाय वारं-वारं प्रयत्नम् अकरोत् । सः जलस्य पाने सफलः न अभवत् तथा अपि सः निराशः न अभवत् । ततः सः एकम् उपायम् अचिन्तयत् सः पाषाणस्य खण्डानि घटे अक्षिपत् एवं घटस्य तलस्थं जलं घटस्य कण्ठे आगच्छत् । सः पर्याप्तं जलम् अपिबत् । सः अति प्रसन्नः अभवत् ।

**क) एकपदेन उत्तरत -** **(½×4=2)**

अ) काकः कीदृशः आसीत् ?

ब) घटे किम् आसीत् ? (जलम् / एकम्)

स) काकः कस्य मुखे उपाविशत् ?

द) कः निराशः न अभवत् ? (काकः / पिकः)

**ख) पूर्णवाक्येन उत्तरत -** **(2×2=4)**

अ) स्वल्पं जलं दृष्ट्वा काकः किम् अकरोत् ?

ब) पिपासितः काकः कदा प्रसन्नः अभवत् ?

**ग) गद्यांशस्य समुचितं शीर्षकं लिखत ।** **(2)**

**घ) यथानिर्देशम् उत्तरत -** **(1×2=2)**

अ) 'दुःखितः' इति पदस्य विपर्ययं लिखत ।

ब) 'पाषाणस्य' इति पदस्य विभक्तिं वचनं च लिखत ।

## खण्डः - 'ख' (रचनात्मककार्यम् - २० अंकाः)

**प्र.2 अधोलिखितसंवादे रिक्तस्थानानि मञ्जूषायाः समुचितपदैः पूरयत -** **(1×5=5)**

**मञ्जूषा -** अहम्, तत्र, तिष्ठत, संस्कृतग्रामः, पठिष्यामः ।

छात्राः - गुरवे नमः ।

अध्यापकः - नमस्कारः स्वस्थाने (1).................. ।

छात्राः - अद्य वयं कं पाठं (2).................. ?

अध्यापकः - अद्य (3).............'संस्कृतग्रामः' इति पाठं पाठयामि ।

छात्राः - भो अध्यापक ! किं भवान् (4).................. अगच्छत् ?

अध्यापकः - आम् ! कर्नाटके एकः (5)................ अस्ति । किं जानासि ग्रामे सर्वे जनाः संस्कृतेन एव वार्तालापं कुर्वन्ति ?

**प्र.3 स्वविद्यालयस्य वार्षिकोत्सवं वर्णयन् पितरं प्रति पत्रं मञ्जूषातः पदानि चित्वा पूरयत –** **(½×10=5)**

**मञ्जूषा –** भवदीया, पुरस्कारम्, विद्यालयस्य, प्रतिवेदनम्, सप्ताहे, लब्धवती, शिक्षानिदेशकः, पुरस्कारवितरणम्, अभवत्, कार्यक्रमाः ।

चिन्मयः छात्रावासः

नवदिल्ली

तिथिः- **10.03.2019**

परमपूज्याय जनकाय नमः !

अत्र सर्वं कुशलं तत्रास्तु ।

गते (1)............अस्माकम् (2).............वार्षिकोत्सवः (3)...............। अस्मिन् उत्सवे (4)............... प्रमुखातिथिः आसीत् । अस्माकं विद्यालये अनेके सांस्कृतिकाः (5)................ अभवन् केचन् छात्राः अगायन् केचन् च अनृत्यन् । प्राचार्यः विद्यालयस्य (6)...........अपठत् । शिक्षानिदेशकः (7)..................अकरोत् । अहम् अपि (8)................ प्राप्तवती यतः अहं कक्षायां प्रथमं स्थानं (9).................. । मातृचरणयोः मम प्रणामाः ।

(10)............. पुत्री ।
ऋचा

**प्र.4 अधोलिखितं चित्रं मञ्जूषायाः सहायतया पञ्चवाक्येषु वर्णयत् –** **(2×5=10)**

**मञ्जूषा –** शाकस्य आपणम्, विविधानि, शाकानि, आलुकम्, पलाण्डुः, रक्तफलम्, कूष्माण्डम्, सन्ति, वृन्ताकः, जनाः, अम्बा, बालिका, स्यूतः, एतत्, चित्रम्, अस्ति



## खण्डः – 'ग' (अनुप्रयुक्तव्याकरणम् – 20 अंकाः)

**प्र.5 उचितरूपेण शब्दरूपेषु रिक्तस्थानपूर्तिं कुरुत –** **(¼×8=4)**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | अहम् | 1......... | वयम् |
| द्वितीया | 2....... | युवाम् | युष्मान् |
| तृतीया | केन | काभ्याम् | 3....... |
| चतुर्थी | 4....... | ताभ्याम् | तेभ्यः |
| पंचमी | 5........ | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | 6........ | तेषाम् |
| सप्तमी | 7......... | तयोः | 8......... |

**मञ्जूषा –** तस्याम्, आवाम्, तासु, त्वाम्, तयोः, कैः, तस्मात्, तस्मै ।

**प्र.6 मञ्जूषातः उचितधातुरुपं चित्वा रिक्तस्थानपूर्तिं कुरुत -** **(¼×8=4)**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथम | 1 ....... | नमताम् | 2........ |
| मध्यम | नम | 3......... | नमत |
| उत्तम | 4........ | पठाव | पठाम |

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथम | हसेत् | 5......... | हसेयुः |
| मध्यम | धावेः | धावेतम् | 6.......... |
| उत्तम | अपठम् | 7......... | 8.......... |

**मञ्जूषा -** अपठाम, नमतु, अपठाव, नमन्तु, धावेत, नमतम्, हसेताम्, पठानि

**प्र.7 अधोलिखितानि रिक्तस्थानानि कोष्ठक-प्रदत्तैः समुचितपदैः पूरयत -** **(1×4=4)**

क) .............. नमः । (जनकाय/जनकान्)

ख) .............. अभितः पुष्पाणि । (मार्गेषु / मार्गम्)

ग) अलम्..............। (कलहस्य/कलहेन)

घ) भरतः..............न बिभेति । (सिंहात्/सिंहम्)

**प्र.8 अधोलिखितेषु प्रकृति-प्रत्यय-विभागं चित्वा लिखत -** **(1×4=4)**

क) पठितव्यः

अ) पठ् + तव्यत् ब) पठ् + क्त्वा स) ज्ञातव + तव्य

ख) नत्वा -

अ) नम् + ल्यप् ब) नम् + क्त्वा स) नत् + त्व

ग) खेलितुम् -

अ) खे + तुमुन् ब) खेल् + तुमुन् स) खेल + ल्यप्

घ) आगम्य -

अ) आ + गम् + ल्यप् ब) गम + ल्यप् स) आ + गत् + ल्य

**प्र.9 अधोलिखितवाक्यानां संस्कृतभाषायां अनुवादं कुरुत -** **(1×4=4)**

क) तुम दोनों क्रीडाक्षेत्र में दौड़ते हो । ख) वे सब पुस्तकें पढ़ती हैं ।

ग) हम दोनों खेलते हैं । घ) लता पत्र लिखति है ।

## खण्डः - 'घ' (पठितावबोधनम् - ३० अंकाः)

**प्र.10 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

रुचिः - अस्माकं ध्वजे त्रयः वर्णाः सन्ति, अतः त्रिवर्णः। किं त्वं एतेषां नामानि जानासि?

डेविडः - आम्! कथं न ? ध्वजस्य उपरि स्थितः केशरवर्णः त्यागस्य उत्साहस्य च सूचकः । मध्ये स्थितः श्वेतवर्णः सात्विकतायाः शुचितायाः च द्योतकः । अधः स्थितः हरितवर्णः वसुन्धरायाः सुषमायाः उर्वरतायाश्च द्योतकः ।

तेजिन्दरः - शुचे ! ध्वजस्य मध्ये एकं नीलवर्णं चक्रं वर्तते ।

शुचिः - आम् आम्। इदम् अशोकचक्रं कथ्यते । एतत् प्रगतेः न्यायस्य च प्रवर्तकम् । सारनाथे अशोकस्तम्भः अस्ति । तस्मात् एव एतत् गृहीतम् । अस्मिन् चक्रे चतुर्विंशतिः अराः सन्ति ।

**क) एकपदेन उत्तरत -** **(1×2=2)**

अ) ध्वजस्य नीलवर्णं चक्रं किं कथ्यते ?

ब) अशोकस्तम्भः कुत्र अस्ति ?

**ख) पूर्णवाक्येन उत्तरत -** **(1×1=1)**

अ) अशोकचक्रे कति अराः सन्ति ?

**ग) यथानिर्देशम् उत्तरत -** **(1×2=2)**

अ) "शुचितायाः" इति पदे का विभक्तिः ?

ब) 'अस्माकं ध्वजे वर्णाः सन्ति' इति वाक्ये कर्तृपदं किम् अस्ति ?

**प्र.11 अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्, विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्यापरादेवता, विद्या राजसु पूज्यते न हि धनं विद्या-विहीनः पशुः ।।

**क) एकपदेन उत्तरत -** **(1×2=2)**

अ) कः पशुः ?

ब) विद्या कुत्र पूज्यते ?

**ख) पूर्णवाक्येन उत्तरत -** **(1×1=1)**

अ) विदेशगमने का परादेवता भवति ?

**ग) यथानिर्देशम् उत्तरत -** **(1×2=2)**

अ) "गुरूणाम्" इति पदे का विभक्तिः ?

ब) 'विद्या राजसु पूज्यते' इति वाक्ये कर्तृपदं किम् अस्ति ?

**प्र.12 अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत -** **(1×4=4)**

क) का एका पुरुषं समलङ्.करोति ?

ख) कस्याः भाषायाः काव्यसौन्दर्यम् अनुपमम् ?

ग) काः अभ्युदयाय प्रेरयन्ति ?

घ) गजः केन शाखाम् अत्रोटयत् ?

**प्र.13 अधोलिखितेषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -** **(1×4=4)**

क) धावनसमये अश्वः किमपि न खादति। ।

ख) जनाः सर्वकाराय धनम् प्रयच्छन्ति ।

ग) संस्कृते ज्ञानविज्ञानयोः निधिः सुरक्षितोऽस्ति। ।

घ) विद्या राजसु पूज्यते।

**प्र.14 अधोलिखितानां पदानां विभक्तिं वचनं च लिखत -** **(1×4=4)**

| | **विभक्तिः** | **वचनम्** |
|---|---|---|
| क) चित्रपतङ्गाः | ............ | ............ |
| ख) घृणायाः | ............ | ............ |
| ग) सूक्तयः | ............ | ............ |
| घ) भल्लुकैः | ............ | ............ |

**प्र.15 मञ्जूषातः समानार्थकानि पदानि चित्वा लिखत -** **(¼×4=2)**

**मञ्जूषा -** जलदः, वने, परस्य, त्यक्त्वा ।

क) अन्यस्य ................

ख) अम्बुदः ................

ग) अपहाय ................

घ) विपिने ................

**प्र.16 मञ्जूषातः विलोमपदानि चित्वा लिखत -** **(¼×4=2)**

**मञ्जूषा -** विकीर्य, नूतनम्, गृहीत्वा, कठोरः ।

क) स्निग्धम् .................

ख) पुरातनम् .................

ग) चित्वा .................

घ) अपहाय .................

**प्र.17 मञ्जूषातः उचितपदं चित्वा रिक्तस्थानानि पूरयत -** **(1×4=4)**

**मञ्जूषा -** ददति, म चस्य, भ्रातरौ, त्रोटयति ।

क) गजः शुण्डेन वृक्षशाखाः ..................... ।

ख) ................... उपरि अभिनेता अभिनयं करोति ।

ग) धेनवः दुग्धं ...................... ।

घ) तव .................. कुत्र जीविकोपार्जनं कुरुतः?